# १९ एकोनविंश दशकः - भूम्याः दुःखम्

पुरा धरा दुर्जन भार दीना समं सुरभ्या विबुधैश्च देवि ।
विधिं समेत्य स्वदशा मुवाच स चानयत्क्षीर पयोनिधिं तान् ॥ १९-१॥

स्तुतो हरिः पद्म भवेन सर्वं ज्ञात्वाऽखिलान् साञ्जलि बद्धमाह ।
ब्रह्मन् सुरा नैव वयं स्वतन्त्रा दैवं बलीयः किमहं करोमि ॥ १९-२॥

दैवेन नीतः खलु मत्स्य कूर्म कोलादि जन्मा न्यवशो ऽहमाप्तः ।
नृसिंह भावा दतिभीकरत्वं हयानन त्वा त्परिहास्यतां च ॥ १९-३॥

जातः पुन र्दाशरथिश्च दुःखात् दुःखं गतोऽहं विपिनान्तचारी ।
राज्यं च नष्टं दयिता हृता मे पिता मृतो हा प्लवगाः सहायाः ॥ १९-४॥

कृत्वा रणं भीममरिं निहत्य पत्नीं च राज्यं च पुनर्गृहीत्वा ।
दुष्टापवादेन पतिव्रतां तां विहाय हा दुर्यशसाऽभिषिक्तः ॥ १९-५॥

यदि स्वतन्त्रोऽस्मि ममैवमार्तिः न स्याद्वयं कर्म कलाप बद्धाः ।
सदाऽपि माया वशगा स्ततोऽत्र मायाधिनाथां शरणं व्रजामः ॥ १९-६॥

इतीरितै र्भक्ति विनम्र शीर्षैः निमीलिताक्षै र्विबुधैः स्मृता त्वम् ।
प्रभात सन्ध्येव जपासुमाङ्गी तमोनिहन्त्री च पुरः स्थिताऽऽत्थ ॥ १९-७॥

जाने दशां वो वसुदेव पुत्रो भूत्वा हरि र्दुष्टजनान् निहन्ता ।
तदर्थशक्ती रहमस्य दद्यां अंशेन जायेय च नन्दपुत्री ॥ १९-८॥

यूयं च साहाय्य ममुष्य कर्तुं अंशेन देवा दयिता समेताः ।
जायेध्व मुर्व्यां जगतोऽस्तु भद्रं एवं विनिर्दिश्य तिरोदधाथ ॥ १९-९॥

विचित्र दुष्टासुर भाव भार निपीडितं मे हृदयं महेशि ।
अत्रावतीर्येद मपाकुरु त्वं माता हि मे ते वरदे नमोऽस्तु ॥ १९-१०॥